✧˖°*❋ ❋*°˖✧

# संकटनाशन गणेश स्तोत्र – प्रणम्य शिरसा देव गौरीपुत्रं (Shri Sankat Nashan Ganesh Stotra)

**in Bangla**

## সংকট নাশন গণেশ স্তোত্রম্

✧˖°*❋ ❋*°˖✧

# সংকট নাশন গণেশ স্তোত্রম্

**নারদ উবাচ ।**
প্রণম্য শিরসা দেবং গৌরীপুত্রং বিনাযকম্ ।
ভক্তাবাসং স্মরেন্নিত্যমাযুষ্কামার্থসিদ্ধযে ॥ 1 ॥

প্রথমং বক্রতুংডং চ একদংতং দ্বিতীযকম্ ।
তৃতীযং কৃষ্ণপিংগাক্ষং গজবক্ত্রং চতুর্থকম্ ॥ 2 ॥

লংবোদরং পংচমং চ ষষ্ঠং বিকটমেব চ ।
সপ্তমং বিঘ্নরাজং চ ধূম্রবর্ণং তথাষ্টমম্ ॥ 3 ॥

নবমং ভালচংদ্রং চ দশমং তু বিনাযকম্ ।
একাদশং গণপতিং দ্বাদশং তু গজাননম্ ॥ 4 ॥

দ্বাদশৈতানি নামানি ত্রিসংধ্যং যঃ পঠেন্নরঃ ।
ন চ বিঘ্নভযং তস্য সর্বসিদ্ধিকরং পরম্ ॥ 5 ॥

বিদ্যার্থী লভতে বিদ্যাং ধনার্থী লভতে ধনম্ ।
পুত্রার্থী লভতে পুত্রান্মোক্ষার্থী লভতে গতিম্ ॥ 6 ॥

জপেদগণপতিস্তোত্রং ষড্ভির্মাসৈঃ ফলং লভেত্ ।
সংবত্সরেণ সিদ্ধিং চ লভতে নাত্র সংশযঃ ॥ 7 ॥

অষ্টভ্যো ব্রাহ্মণেভ্যশ্চ লিখিত্বা যঃ সমর্পযেত্ ।
তস্য বিদ্যা ভবেত্সর্বা গণেশস্য প্রসাদতঃ ॥ ৪ ॥

**ইতি শ্রীনারদপুরাণে সংকষ্টনাশনং নাম গণেশ স্তোত্রম্ ।**

✧˳·˖✶ ❋ ❋ ✶˖·˳✧